# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – २** | **गुणाः – ५०** |
| **विषयः – वास्तुशास्त्रम्** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १४/०७/२०२१** | **सन्दर्भग्रन्थः – मयमतम् (११ तः १८ अध्यायाः)** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ रक्षोगन्धर्वयक्षाणामेकादशतलं मतम्।
विप्राणां नवभौमं स्याद् दशभौममथापि वा॥

२ सर्वद्रव्यैस्तु सम्पन्नं गर्भं तत् सम्पदां पदम्।
द्रव्यहीनमसम्पन्नं गर्भं सर्वविपत्करम्॥

३ मध्ये हेममथं चक्रं वामे राहुं च राजतम्।
कार्मुकं ताम्रजं वामे दण्डो रुक्मेण दक्षिणे॥

४ खड्गं चायसमेव स्याच्चतुर्नागाश्चतुर्दिशि।
हैममायसकं ताम्रं राजतं क्रमशो न्यसेत्॥

**प्रश्नः २** प्रथमेष्टिका(ईंट)निर्माणे मुहूर्तादिविचारः क्रियताम्।

**प्रश्नः ३** सुभद्रगृहस्य विचारः क्रियताम्।

**प्रश्नः ४** गृहेषु प्रयुक्त-शुभाशुभवृक्षविचारः क्रियताम्।

**प्रश्नः ५** स्तम्भलक्षणं विलिख्यताम्।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ उत्तरं त्रिविधं पादविस्तारं तत्समोद्गमम्।
त्रिपादोदयमध्योच्चं विस्तारं पादतः समम्॥
खण्डोत्तरं पत्रबन्धं रूपोत्तरमिति त्रिधा।
त्रिपादं वा त्रिभागोनमर्धं वा कर्णनिर्गमम्॥

२ आलिङ्गं पादपादोच्चं पादात् पादविनिर्गतम् ।
तस्मादन्तरितं चोर्ध्वे निष्क्रान्तावेशनक्रियम् ॥

३ मल्ललीलं तथा ब्रह्मराजं वै वेणुपर्वकम् ।
पूकपर्वं देवसन्धिर्दण्डिका षड्विधाः स्मृताः ॥

४ दिग्विदिग्द्वारदेवांशं सर्वं त्यक्त्वा प्रयोजयेत् ।
अर्कार्किवरुणेन्दूनां स्थानं दिगिति कीर्तितम् ॥

**प्रश्नः ७** गृहेषु भित्तिविचारः क्रियताम् ।

**प्रश्नः ८** सन्धिकर्मविधानं विलिख्यताम् ।

**प्रश्नः ९** शिखरभेदविचारः क्रियताम् ।

**प्रश्नः १०** शिखरावयवमानानि विलिख्यताम् ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ मयमतं कः रचितवान् ?
२ भित्तिः शब्दस्य अर्थः कः ?
३ इष्टिकासंयोजनानन्तरं मध्ये किं स्थाप्यते ?
४ स्थूपिका शब्दस्य अर्थः कः ?
५ पुष्टिमार्गस्य गुरुपूजनविधिः कः ?
६ पटशब्दस्य अर्थः कः ?
७ वास्तुदेवानां बलिं न दीयते तदा फलं किम् ?
८ उष्णीष शब्दस्य अर्थः कः ?
९ प्रासादादिसम्प्रोक्षणे को लाभः ?
१० स्थपतिः इत्युक्ते कः ?
११ वास्तुगृहनिर्माणानन्तरं किम् अपेक्षते ?
१२ सम्प्रोक्षणं कदा कर्तव्यम् ?
१३ उत्तरं (स्तम्भस्य उपरि भित्तिः) कतिविधं भवति ?
१४ प्रासादादिनिर्माणे कति कलशाः स्थापनीयाः ?
१५ स्तम्भस्य कमपि पर्यायशब्दं लिखत ।

****